चिन्तामणिषट्पदी

{॥ चिन्तामणिषट्पदी ॥}

चिन्तामणिषट्पदी ।

श्रीगणेशाय नमः ।

द्विरदवदन विषमरद वरद जयेशान शान्तवरसदन ।

सदनवसादन सादनमन्तरायस्य रायस्य ॥ १॥

इन्दुकल कलितालिक सालिकशुम्भत्कपोलपालियुग ।

विकटस्फुटकटधाराधारोऽस्य प्रपञ्चस्य ॥ २॥

परपरशुपाणिपाणे पणितपणायेः पणायितोऽसि यतः ।

आरूह्य वज्रदन्तं विदधासि विपदन्तम् ॥ ३॥

लम्बोदर दूर्वासन शयधृतसामोदमोदकाशनक ।

शनकैरवलोकय मां यमान्तरायापहारिदृशा ॥ ४॥

आनन्दतुन्दिलाखिलवृन्दारकवृन्दवन्दिताङ् घ्रियुग ।

साराप्रदण्डरसालो नागजभालोऽतिभासि विभो ॥ ५॥

अगणेयगुणेशात्मज चिन्तकचिन्तामणे गणेशान ।

स्वचरणशरणं करुणावरुणालय पाहि मां दीनम् ॥ ६॥

कचिरवचोऽमृतरावोन्नीता नीता दिवस्तुतिः स्फीता ।
इति षट्पदी मदीया गणपतिपादाम्भुजे विशतु ॥ ७॥

इति चिन्तामणिषट्पदी समाप्ता ॥

Encoded and proofread by

Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Chintamani Shatpadi Lyrics in Devanagari PDF
% File name : chintAmaNi6.itx
% Category : ShaTkam
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P, Amith K Nagaraj (amithkn at rediffmail.com)
% Proofread by : Karthik Chandan.P, Amith K Nagaraj (amithkn at rediffmail.com)
% Description-comments : mudgalapurANa
% Latest update : January 2, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.

%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website